॥६०॥ ॐ नमः सिद्धं ॥ श्रीसंखेश्वरपार्श्वनाथाय नमः ॥ महोपाध्यायश्रीविमलहर्षगणिगुरुभ्यो नमो नमः ॥
कल्याणांकुरहृदयेऽकुलधूरं सर्वार्थसंपत्तिकृत् । पादौ लोकयुगं जगज्जनमनःसंकल्पकल्पद्रुमं । तेजीर्यस्य सु
राजराजतिहते विश्वत्रयीकामधुक् स श्रीवीरजिनेश्वरो जनयतान्निश्रेयसीं संपदं ॥१॥ प्रणम्य निखिलान् सूरी
न् स्वगुरूंस्तातादयं कुर्वे स्वबोधविधये सुगमां कल्पदीपिकां ॥२॥ पुरिमचरिमाण कप्पो मंगलं वद्धमाण
तित्थंमि । इह परिकहिया जिणगणहराइ थेरावली चरित्तं ॥१॥ इह तावच्चतुर्मासीसंस्थिताः साधवो मंगल
निमित्तं पर्युषणापर्वणि पंचदिनानि कल्पसूत्रं वाचयंति । तत्र कल्प इति कोर्थः साध्वाचारः स च दशविधः
तथाहि । आचेलुक्कुद्देसिअ सिज्जायर रायपिंड किइकम्मे । वयजिट्ठ पडिक्कमणे मासं पज्जो
सवणकप्पे ॥१॥ अत्र कल्पशब्दः सर्वत्र योज्यस्तत्र । आचेलक्यं श्रीवर्द्धमानऋषभादिजिनानाश्रित्य देवदू
ष्योपनीतदेवदूष्यापगमे यावज्जीवं अन्येषां तु तस्या भावाद्यावज्जीवं साचेलकत्वं । प्रथमांतिमजिनेंद्रसाधू
नां तु द्विधापि श्वेतमानोपेतानां जीर्णप्रायाणां वा वस्त्राणां धारित्वात् अचेलकत्वमिति व्यपदिश्यते अजितादि
तीर्थंकरसाधूनां ऋजुप्रज्ञत्वात् महामूल्यमानाधिकवस्त्रधारित्वेन सचेलकत्वं ॥१॥ प्रथमः तथा साधूनुद्दिश्य क्रियते
तदौद्देशिकं । प्रथमांतिमजिनतीर्थे यत् कंचनैकमुद्दिश्य कृतं सर्वेषां तत् पिंडादि अकल्प्यं अजितादिसाध्वपेक्षया तु यमु
द्दिश्य कृतं तत् तस्यैव अकल्प्यं अन्यसाधूनां कल्प्यं यदाह संघाउद्देसेणं उवाईदिन्नं समणाइ अहिगिच्च कडमिह सव्वेसिं चिअ न क २

प्पइ पुरिमचरिमाणं तु ॥२॥ व्याख्या । संघाद्युद्देशेन संघोपाश्रयालंबनेन उवाईदिन्नं सामान्यविशेषाभ्यां त
त्र संघार्थमिति विकल्पः सामान्यं विशेषस्तु प्रथमजिनसंघार्थं चरमजिनसंघार्थं चेति विकल्पः एवमुपाश्रय
माश्रित्य ॥ पे समणाइ अहिगिच्च त्ति श्रमणान् श्रमणीश्चाधिकृत्येत्यर्थः द्वाविंशतिजिनतीर्थे तु यं साधुसंघादिकमु
द्दिश्याधाकर्म्म कृतं तत्तस्यैवाकल्प्यं अन्यसाधूनां तु कल्प्यं यतः मज्झिमगाणं तु इमं जं कडमुद्दिस्स तस्स चेव त्ति
नो कप्पइ सेसाण उ तं कप्पइ एस मेरत्ति एषा मर्यादा ॥ प्रथमांतिमतीर्थे तु एकं कंचन साधुमुद्दिश्य कृतं आधा
कर्म्म तत्सर्वेषां साधूनामकल्प्यं इति द्वितीयः ॥२॥ शय्यावसतिस्तया तरति शय्यातरो वसतिस्वामी
तस्य पिंडः असन१ पान२ खादिम३ स्वादिम४ वस्त्र५ पात्र६ कंबल७ रजोहरण८ सूची९ पि
प्पल१० नखरदनिका११ कर्णशोधनरूप१२ रूपः द्वादशविधः सर्वतीर्थंकरतीर्थेषु अकल्प्यः यदु
क्तं सिज्जा उ राओ त्तिन्नि सए आलयसामी उ तस्स जो पिंडो सो सव्वेसिं न कप्पइ पसंगगुरुदोसलाघवउ त्ति
पसंगेत्ति प्रसंगस्तु इहैव प्रसंगो जं गुरुवो महंतो दोसा तेसिं साबोसलवं उत्पत्तिस्तस्मादित्यर्थः दोषबहु
त्वं च संनिहितसाधुगुणानुरागेण पारणाके प्रथमालिकाद्यर्थं वारंवारं प्रवेशने अमुपादारसंलवात् मिष्ट
अन्नपानादिलालनतत्कुलापरित्यागात् कारणाद्दूरगतस्यापि पुनरागमनात् विशिष्टाहारोपधिभ्यां शरीरोप
धिलाघवात् एनवसतिर्देया तेन आहाराद्यपि देयमिति लयोत्पादात् तद्दानस्याच वसतेर्दौर्लभ्यात् वसात

स्नानाच्च भक्तपानशिष्यादिव्यवच्छेदाच्चेति तीर्थकृत्प्रतिषिद्धत्वादिति भावः तत्परित्यागेन निःस्पृहत्वप्रदर्शनरूपगुणे
न श्रद्धावृद्धिप्रवचनगौरवादिगुणाः स्युः कृतिकारणादौ शय्यातरगृहाहारग्रहणं कथं कार्यमिति चेदुच्य
ते यदि रात्रौ सुप्त्वा शय्यायां मात्रं जागर्ति स्वाध्यायाद्यनुष्ठानपरः प्राभातिकावश्यकाद्यन्यत्र करोति तदा मूलस्वामी
शय्यातरो न भवति तदन्यो भवति यदि च तत्रैव सुप्त्वावश्यकाद्यन्यत्र कृतं तदा उभावपि शय्यातरौ भवतः यदु
क्तं जइ जग्गंति सुविहिआ करिंति आवस्सयं च अन्नत्थ। सिज्जायरो न होइ सुत्ते व कए व सो होइ १ तथा तृ
ण डगलभस्ममल्लक पीठ फलक शय्या सं। स्तारक लेपादिवस्तूनां ग्रहणे सोपधिकस्त्वदी
क्षादानं आज्ञया कल्पत्वात् शय्यातरान भवति यतः तणडगलछार मल्लग सिज्जासं
थारपीढलेवाइ सिज्जायरपिंडो सो न होइ सेहो अ सोवहिउ १ इति द्वितीयः ३ सेनापति १ पुरो
हित २ श्रेष्ठि ३ अमात्य ४ सार्थवाह ५ युक्तो यो राज्यं भुनक्ति चक्रवर्त्यादि तस्य अशनादि चतुष्कं वस्त्रं प
पात्रं कंबलं रजोहरणं च इत्यष्टविधः पिंडः प्रथमांतिमतीर्थकृत्तीर्थे व्याघातादिदोषदूषितत्वात् अकल्प्यः
अजितादितीर्थकृतां तीर्थे साधूनां ऋजुप्रज्ञत्वाद्दूषणाभावात् यदुक्तं सुदिआइगुणेराया अट्ठविहो तस्स होइ
पिंडुत्ति पुरिमेअराण एसो वाघाईदिंपडिकुट्ठो १ व्याघातादयः पुनरेवं स्युः ईसरपभिईहिं तहिं वाघाउ खलो
अ वारणं दंसणासंगो गरहा इअरेसि न अप्पमायाओ २ व्याख्या ईश्वरयुवराजप्रभृतयः सपरिवारा राज्ञो २

यांति च तत्र राजकुले व्याघातः स्खलना वेलातिक्रमे च साधूनां स्वाध्यायादिव्याघातोऽथवा तत्र प्रविशतां ऊ
नसंमदाति अमंगलबुद्ध्या चालुष्यादिभ्यो व्याघातो हननं स्यात् खद्दलोद्दंति विशिष्टवस्त्रतांबूलादिलोभः तथाउ
दाराणां दस्यप्रपुरुषस्त्रीणां दर्शने संगात् चित्तभंगः स्यात् ततश्चौर्यशंकादिशंकया तस्यां संघात्कपातो वा भ
वति तथा गर्हा अहो निःसंगोऽपि नित्यमपि राजपिंडं गृह्णाति यदुक्तं स्मार्ते राजप्रतिग्रहदग्धानां ब्राह्मणा
नां युधिष्ठिर विप्रानामिव बीजानां पुनर्जन्म न विद्यते ।१। अथवा अदृष्टकल्याणा इष्टेति गवाश्वादिषु संगं
कुर्वंतीति गर्हा आद्यतीर्थापाः किं अजितादितीर्थेषु न स्युः अत आह इअरेसि एण अप्पमायाओ तेषां न चै
ते दोषा भवंति अप्रमादात् यतस्ते ऋजुप्रज्ञत्व गुणयुक्ताः इति तेषां राजपिंडग्रहणमनुज्ञा अन्येषां तु
ऋजुजडवक्रजडत्वेन प्रायः प्रमत्तत्वान्निषिद्धः इति चतुर्थः ४ तथा कृतिकर्मवंदनकं तद्द्विधा अभ्युत्था
नं द्वादशावर्त्तवंदनभेदात् द्वितीयमपि सर्वैः तीर्थकृत्तीर्थेषु यथापर्यायादिना सर्वैरपि कार्यं साध्वी
भिः सर्वाभिः पुरुषप्रधानत्वात् सर्वैरपि साधवो निर्वंद्या एव उक्तं च सव्वाहिं संजईहिं किइकम्मं संजयाण कायव्वं पु
रिसुत्तरो धम्मो सव्वजिणाणंपि तित्थेसु १ अतस्ताभिः पर्यायादिक्रमं प्रेक्ष्य तासां वंदने च प्रवचनमालिन्यापत्ति
ः स्यात् तासां गर्वादिदोषाश्च स्युः यतः तुच्छत्तणेण गव्वो जायइ न संकइ परिभवेण अन्नो वि हु कादोसो थि
यासु माद्दवकिच्चासु १ स्त्रीषु माधुर्यदार्यस्थित्यर्थं तथा त्वेषं च वंदनीया विधानेऽस्मिमानान्नैवे गौरवं बंधः किं

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

वास्मिन्नासनेविनयोनविधीयतेइतिप्रवचनखिंसा। तथाचतत्कारकाणां बोधिबीजहानिर्दीर्घसंसारापत्तिः
स्यात् ततोयथापर्यायंवंदनंकार्यं इतिपंचमः तथाव्रतानि महाव्रतानि तेषांकल्पोव्रतकल्पः सचतत्राताऽन्ते
देपिप्रथमचरमतीर्थयोः पंचमहाव्रतात्मकः अजितादितीर्थेषुचतुर्व्रतः उक्तंच पंचव्वतोखलुधम्मो पुरिमस्सयप
च्छिमस्सयजिणस्स मज्झिमगाणजिणाणं चउव्वओहोइविन्नेओ १ नोअपरिग्गहिआए इत्थीएजेणहोइपरिभो
गो ताततव्विरईअब्बिय अबंभविरइत्तिपन्नाणं २ इ छविइविहोविकिओ एमोआजम्मामचविन्नेओ इत्थव
यत्तेयाउविच्छाणमविहोविवतन्नेणं ३ इतिषष्ठः (कप्पे) षाज्येष्ठोरत्नाधिकःसएवकल्पः ज्येष्ठकल्पः हत्ब्रम
वत्थारः प्रथमांतिमतीर्थकृत्तीर्थयोरुपस्थाप नातः आरभ्य पर्यायः अन्येषांतीर्थेषु निरति
चारित्राद्दीक्षातएवपर्यायः उक्तंच उवट्ठावणाइ। जिणे विन्नेउपुरिमपच्छिमजिणाणंपव्वज्जाएउतव्वा
मज्झिमगाणंनिरइआरा १ इतिसप्तमः प्रतिक्रम णकल्पः षड्विधावश्यककरणरूपस्तत्र अतीचारा
सन्तुमावा परं प्रथमांतिमतीर्थकृत्तीर्थयोः स्वल्पसंध्यमवश्यमावश्यकंविधेयमिति अन्येषांतीर्थकृतांतीर्थेषु
सतिकारणेप्रतिक्रमणंविधेयंनान्यथेति उक्तंच सपडिक्कमणोधम्मो पुरिमस्सयपच्छिमस्सयजिणस्स मज्झि
मगाणजिणाणं कारणजाएपडिक्कमणं १ इत्यष्टमः प्रथमांतिमतीर्थ मासकल्पस्यावश्यकत्वं व्याचननि
त्यत्वं अन्यथाप्रतिबंधादिदोषसंभवः यतः पडिबंधलहुअत्तं नजणुवयारोनदेसविन्नाणं ३

नाणाराहणामय दोसाअविहारपक्खंमि १ नाणाराहणत्ति नाज्ञाराधना यतः मोत्तूणमासकप्पं अन्नो
सुत्तंमिनच्छिउविहाराति तथाविधकारणेतु एकस्मिन्नपिक्षेत्रे उपाश्रयादिपरावर्त्याविधेयः शेषती
र्थकृतांतुतीर्थेषु ऋजुप्रज्ञ[illegible]त्वाउक्तदोषासंभवात् अस्थितः उक्तंच पुरिमंतिमतित्थगराण मासकप्पोठिओ
जिणेयरेण मज्झिमगाणजिणाणं अठिअकप्पोजिणअवो १ इतिनवमः तथापरिसामस्त्येन एकत्रावस्थ
ताक्षेत्रमात्रवसनं पर्युषणा इत्यन्याथापि पर्युषणा शब्दः कश्चिच्चतुर्मासकस्यान्निश्चयकः कश्चित्सां
वत्सरिकप्रतिक्रमणकपलक्षितपर्वदिनस्यापि सएवकालकसूरितरवगि साऽपदचतुर्थ्येवतिकी
धं तत्रपर्वप्रसिद्धेइमेवकल्पः पर्युषणाकल्पः। सचसालंबननिरालंबनभेदाद्विधा निराल
बनोपिद्विधा जघन्यतस्तु सप्ततिदिनमानः उत्कृष्ट स्तु चातुर्मासिकः सालंबनस्तु स्थविरकल्पिकाना
षाण्मासिकोपिभवति यतः काऊणमासकप्पं तत्थेव ठियाणतीसमग्गसिर सालंबणाणछम्मा
सिउहोइजिट्ठुग्गहोत्ति १ किंचनिरालंबनःस्थविराणामेव द्विविधो नतुजिनकल्पिकानां तेषांतूत्कृष्टनिरा
लंबनस्यैवोक्तत्वात् तदुक्तं चाउम्मासोक्कोसो सत्तरिराइंदिआजहन्नोअ थेराणजिणाणंतु णियमाउक्को
सोसत्तरिव २ इत्थयअणभिग्गहिअं वीसइराईसवीसईमासो तेणपरमभिग्गहिअं गिहिनायंकत्तिअंजा
व ३ इत्थंव्याख्यातस्वरूपः पर्युषणाकल्पः प्रथमांतिमजिनतीर्थयोर्नियतः इतरेषांचानियतो दोषाभावे

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी स्मारक

प्रवर्त्तितोस्मि परीक्षंति पक्षत्रादस्थिति इत्तरथा नमासमपीति एवं विदेहे पीति यतः दोसासइ मज्झिमगा
अच्छंति अन्नाव पुव्वकोडी वि इहरा उ न मासं पि हु एवं खु विदेहजिणकप्पे ॥१॥ कारणसद्भावे च प्रथ
म चरमार्हत्तीर्थसाधूनामपि पर्युषणाकल्पेऽप्यापेक्षितमनं संभवति तानि च कारणान्येवं काऽअन्ना
सिसंथारए अ संसत्तदुल्लहे सिरिक्के एएहिं कारणेहिं अप्पत्ते होइ निग्गमणं ॥१॥ वासासप्पेकुंथ अगिणि
गिलाणे थंडिलस्स असइ एएहिं कारणेहिं अप्पत्ते होइ निग्गमणं ॥२॥ असिवे ओमे अरिण रायदुट्ठे भए
अ गेलन्ने एएहिं कारणेहिं अप्पत्ते होइ निग्गमणं ॥३॥ कारणे तु चतुर्मासकानंतरमपि स्थितिः य
तः वासं वा नो विरमइ पंथा वा दुग्गमा सचिक्खल्ला ॥१॥ एएहिं कारणेहिं अइक्कंते होइ निग्गमणं
॥१॥ इति दशमः एते दशापि कल्पाः प्रथमांतिमजिनतीर्थे नियताः शेषजिनतीर्थे च केचन नि
यताः केचन अनियताः यदाहुः आचेलुक्कुद्देसिअ ॥२॥ पडिक्कमणे रायपिंड मासे चउ पज्जुसणाकप्प
मि इय अट्ठिअकप्पा सुणेअव्वा ॥१॥ सिज्जायरपिंडंमि अ ॥१॥ चाउज्जामे अ ॥२॥ पुरिसजिट्ठे अ ॥३॥ किइकम्मस्स य कर
णे ॥४॥ ठिअकप्पो मज्झिमाणंमि ॥२॥ प्रथमचरमतीर्थयोस्तु दोषाभावेऽपि एतेषामवश्यं विधेयत्वमुक्तं तृतीयरसायनव
त् तथाहि वाहिमवणेइ भावे जणइ अभावे तयं तु पढमं ति ॥१॥ बीअमवणेइ न कुणइ ॥२॥ तइअं तु रसायणं होइ ॥३॥ अत्र दृष्टां
तः कस्यचिन्नृपतेर्भूतिर्मनोरथः पुत्रो जातस्तस्यागामिरोगोत्पत्तिनिवारणार्थं राज्ञा वैद्यत्रयमाकार्य ४

तवद्भिः स्वरसायनैस्तथाविधेयं यथा मम सुतस्य रोगा नागच्छेयुः इत्युक्ते प्रथमः प्राह सति रोगे तं निवारयति म
दीयं रसायनं असति च रोगे तं दीरयति इति श्रुत्वा नृपतिः दोषापनेनालमित्युक्त्वा तं निषिद्धः द्वितीयः प्राह
सति रोगे तं निवारयति न पुनरसत्तं प्रकटीकरोति तस्मिन्नपि तमित्युदीर्यासावपि प्रतिषिद्धः तृतीयस्त्वाह मदीयं
रसायनं सति रोगे रोगं निवर्त्तयति असत्यवाच्यामृतवत्सर्वधातूनां पुष्टिकृत् नाऽनागतकालं च रोगाः प्रादुर्भवंति
इत्याकर्ण्य संतुष्टो राजा बहुमानितः स्वपुत्रकल्याणाधायं तृतीयरसायनप्रायं यथोक्तं एवं एसो कप्पो दो
सासावविकज्जमाणो अ सुंदर भावानवरत्तु चारित्तरसायणं होइ ॥१॥ तथैतेषां दशानां कल्पानां नि
यतानियतविभागकरणं कारणं तत्रकालीनामृजुजडवक्रजडाः पुरिमा उज्जुजड्डा उ
वक्कजडा य पच्छिमा मज्झिमा उज्जुपन्ना उ तेण धम्मे दुहा कए ॥१॥ पुरिमाणं दुव्विसोझो चरिमाणं दुर
णुपालओ कप्पो मज्झिमगाणं तु सुविसोझो सुपालओ ॥२॥ तत्र ऋषभतीर्थे ऋजुजडत्वेन व्रतादिनिर्वाहोऽपि
पि नटनर्तकीदृश्यावलोककमुनिदृष्टांतप्रदर्शितेन जडत्वेन दुःसाध्यः विशुद्धिः अत्र संप्रदायः श्रीऋष
भतीर्थे केचन साधवो गुरुपार्श्वात् शरीरचिंतार्थं गत्वा आगताः पृष्टाश्च गुरुभिः कथं महती वेला लग्ना तत
स्तैरुक्तं नटं नृत्यंतं प्रेक्षमाणाः स्थिताः गुरुभिस्तु शिक्षिताः मा पुनरेवं कार्षुः आगमनिषिद्धत्वात् ऋजुत्वात्
स्तथ्यमुपगम्य मिथ्यादुःकृतं दत्तं ततोऽन्यदा तथैव नटीं नृत्यंतीं विलोकयंतः स्थिताः नोदितास्ते जडत्वाद्दुर्युक्त्या

निर्णीतवन्नटी निषिद्धा नास्ति रागांगहेतुत्वान्नटनिषेधे नटी निषिद्धैवेति गुरुभिरुक्ते ते मिथ्यादुष्कृतं द
त्त्वा अत्रान्योपि दृष्टांतः एकः कश्चित्कोंकणदेशीयो वणिक् वृद्धत्वे स्वजनं मोहं त्यक्त्वा प्रव्रजितः सा
विकृद्धा ईर्यापथिकीकायोत्सर्गे चिरकालं स्थितः किं कारणमिति गुरुभिरुक्ते जीवदयाध्यातेत्युक्ते कथ
मित्युक्ते सोऽवादत् यदाहं गृहवासे स्थितोस्मि तदा क्षेत्रेषु वृक्षनिकृंतनादिपूर्वं यथा निधानानि कुलीनवंतिस्म सांप्रतं
मत्पुत्रा अकुशला निश्चिंताः सम्यग् न विदंति तेन ते दुःखिता मरिष्यंतीति तेन स्वाक्षिभायेप्रोक्ते जीवघाताद्वि
विनाकृपेनैनिष्यात इति त्वया दुर्ध्यातमित्युक्ते गुरुणा कृतस्तत्र मिथ्यादुष्कृतं दत्तवान् इति कोंकण
कसाधुदृष्टांतः प्रातयांचऋजडत्वाद्विशुद्धिर्दुःसाध्या तथा वीरतीर्थे वक्रजडत्वाद् व्रतादिपाल
नं तद्विशुद्धिश्चेत्युक्तयमपि दुःसाध्यं अत्रापि मे प्रदायद्वयं कश्चित्साधवो नटं वीक्ष्य वेलाति
क्रमेण समायाताः सूरिभिः शिक्षिताः कथं वेलातिक्रमो कृतः तथैवोचुः प्रोक्ते निषिद्धाः पुनरन्यदा नटी
नृत्यमानां वीक्ष्यागताः पृष्टाश्च गुरुणा चक्रजडत्वाद्युक्तयुक्ताः नटनिषेधेन पुनर्नटीति
नास्माभिर्ज्ञातमित्युक्ता उपालब्धाः प्रस्तुतगुरवः पृष्ट तथा कोपि दुर्विनीतः श्रेष्ठिपुत्रः स्वजनादिसमक्षंपि
शिक्षितो न दिह्सहानो प्रस्तुत्तरं दयमिति ततोसौ मातापितृभ्यां निर्घाटितः कदाचिद्द्वारे द्वास्थितः इत्या
गतास्तेषां द्वारोद्घट्टनाय याक्कापि नोद्घाटयति शिक्षितस्ते लेख्यादिविवरणाः॥ ५

स्वादं स तु उपालब्धो वदत्यभ्यारिरेव शिक्षितोस्मीति वक्रजडत्वात्स उत्तरितवान् ३ अजितादितीर्थेषु तु
तथैव नटं वीक्ष्यागताः स्तगुरुणा निराकृतास्ते ततः एकदा नटीं नृत्यंतीं दृष्ट्वा ऋजुप्रज्ञत्वात् नटनिषेधेसु
तरां नटी निषिद्धैवेति चिंतयंतो तिष्ठंतोऽतएव नियतानियताद्विविभागेन तत्रकालीनसाधून् स
मुद्दिश्य दशविधकल्पस्य किंचित तद्दशविधकल्पांतर्गतः पर्युषणाकल्पो गुणावतिक्षेत्रेकार्यः क्षेत्रगुण
श्चोत्कृष्टेतरभेदभिन्नत्वेन त्रिविधा तत्रोत्कृष्टास्त्वेवं त्रयोदशगुणाः चिक्खिल्ल १ पाण २ थंडिल ३ वसही ४
गोरस ५ जणाउले ६ विज्जे ७ ओसह ८ निचय ९ अहिवइ १० पासंडा ११ भिक्ख १२ सज्झाए १३ १ य
त्र यत्रत्यानुकर्दमो न स्यात् १ यत्र संमूर्छिमा बहवः प्राणा न स्युः २ यत्र अना
पातमसंलोकं परिष्ठापनस्थानं स्यात् ३ यत्र स्त्र्यादिरहिता वसतिः स्यात् ४ यत्र दधिदुग्धादि
दि प्रचुरं स्यात् ५ यत्रातिसत्कृतो लोकः भद्रालुः स्यात् ६ यत्र सद्वैद्याः स्युः ७ यत्रौष
धानि सुलभानि स्युर्वंति ८ यत्र कुटुंबानां धनधान्याचितानि गृहाणि स्युः ९ यत्राधिपती राजादिर्भ
द्रको भवति १० यत्र ब्राह्मणतापसादिलिंगिनः स्युः न च तेभ्योऽपमानं स्यात् ११ यत्र भैक्ष्यं सुलभं स्यात्
१२ यत्र स्वाध्यायो न वा यत्रान्यत्र वा स्वाध्यायः कर्तुं शुध्यति १३ जघन्यतस्तु चत्वारो गुणास्ते चैवं सुलदा
विहारभूमी १ वियारभूमीय २ सुलभस्वाध्याय ३ सुलभा भिक्षाय ४ उदन्नयचासविवं ३ १ व्याख्या

विहाराः प्रासादाः विचारभूमिः शरीरचिंतानिवृत्तिस्थानं २ सुलेसे स्वाध्यायस्थानं ३ सुलसागोचरिकाः ४
इति चतुर्गुणोपेतं जघन्यं वर्षाक्षेत्रं पंचादिदशगुणोपेतं तु मध्यं उक्कं त चउगुणोववेयं तु खिल्लंपा
णजदन्नयं तेरसगुणसुक्कोसं दुष्टुमज्झिममज्झिमं १ तदेवं क्षेत्रादिगुणालोचनपूर्वं पर्युषणाकल्पं वि
धाय तत्र चोपस्थिते मंत्राणां परमेष्ठिमंत्रमहिमा तीर्थेषु शत्रुंजयो दाने प्राणिदयागुणेषु विनयो व्रते
ब्रह्मव्रतं संतोषो नियमे तपस्सु च शमस्तत्त्वेषु सम्यग्दर्शनं सर्वज्ञोदितमर्वं पर्वसु पर्युषणाधिकं पर्वेदं १६
त्यादिरत्नव्यावर्णितसद्भूतमहिमनि श्रीकाल काचार्यवितरणातो भाद्रपदशुक्लचतुर्थीलक्ष
णे श्रीवार्षिकपर्वणि आपर्वदिनात् पंच भिरेव दिनैः सुविहितसाधुभिर्वाच्यमान
श्चतुर्दशपूर्वधरश्रीभद्रबाहुस्वामिभिः प्रत्याख्यानप्रवादात्सिद्धनवमपूर्वात् श्रीदशाश्रु
तस्कंधाष्टमाध्ययनत्वेन समुद्धृतार्थः समसूत्रतः स कलकल्पितार्थवितरणकल्पद्रुकल्पः श्रीकल्पः
कल्याणार्थं श्रोतव्यः पूर्वाणि च स्थानानुक्रमेणांतरेष्वा प्रथमं एकेन १ द्वितीयं द्वाभ्यां २ तृतीयं चतुर्भि
३ चतुर्थमष्टभिः ४ पंचमं षोडशभिः ५ षष्ठं द्वात्रिंशता ६ सप्तमं चतुःषष्ट्या ७ अष्टमं अष्टाविंशत्यधिकशतेन ८ न
वमं षट्पंचाशदधिकशतद्वयेन ९ दशमं द्वादशोत्तैः पंचभिः शतैः १० एकादशं चतुर्विंशत्यधिकदशशतैः ११
द्वादशं अष्टचत्वारिंशदधिकविंशत्या शतैः १२ त्रयोदशं षण्णवत्यधिकचत्वारिंशत्शतैः १३ चतुर्दशं द्विनवत्यधि ६
कैकाशीतिशतैः १४ इति प्रमाणमषीपुंजै॥

र्लिखितानि सर्वसंख्यया तु षोडशसहस्रैस्त्रिभिः शतैः त्र्यशीत्यधिकैर्गजप्रमाणमषीपुंजैर्लिखितानि अंकतो
मानं १ १ २ २ ३ ४ ४ ८ ५ १६ ६ ३२ ७ ६४ ८ १२८ ९ २५६ १० ५१२ ११ १०२४ १२ २०४८ १३ ४०९६ १
१४ ८१९२ सर्वसंख्या १६३८३ एवं च नवमपूर्वादपि निष्पन्नं तं श्रीदशाश्रुतस्कंधाष्टमाध्ययनरूपः श्रीकल्पो
बालस्त्र्यादिमंदोपकाराय प्राकृतभाषया निर्दिष्टः यतः बालस्त्रीमंदमूर्खाणां नृणां चारित्रकांक्षिणां अनुग्र
हार्थं तत्त्वज्ञैः सिद्धांतः प्राकृतः कृतः १ ततो नात्रावज्ञा कार्या किं च प्राकृतं प्राकृतमनुष्याः अवगणयंति प
रं ते मूढा एव यदुक्तं नेक्षंति प्राकृतं मूढा मक्षिकाचं दनं यथा क्षीरान्नं शर्करायुक्तं इक्षोर्विकारो विरसो २
इति न वितत्रिरर्थकमित्यपाशंकनीयं सूत्रा स्यानंतार्थत्वात् यतः सव्वनईणं जा हुज्ज वा
लुआ सव्वोदहीण जं हुज्ज उदयं इत्तो अणंतगु णो अत्थो इक्कस्स सुत्तस्स १ नन्वस्य श्रवणे किं
फलमिति चेदुच्यते नवेणवं सच्चिरेण कएण य बहुणा गणणावन्ने कम्मं खवेइ जं तिच्छे तं कप्पसवणे
णाय १ एगग्गचित्ता जिणसासणंमि पभावणा पूअपरायणा जे तिसत्तवारं निसुणंति कप्पं भवन्नवं ते लहु सा
तिरंति २ कल्पः पर्युषणाविधिः कलिमलप्रध्वंसनबद्धादरः कल्पः सर्वसमीहितोदयविधौ कल्पद्रुकल्पः क
लौ यः कल्पं परिवाचयंति निरविकाशं शृण्वंति येषां चादरात् ते कल्पेषु विहृत्य मुक्तिवनितोत्संगे सदा शेरते ३ श्री
महावीरचरित्रबीजमसवत् श्रीपार्श्वादिसांकुरः स्कंधो नेमिचरित्रमादिमजिनव्याख्या च शाखाचयः पुष्पाणि

स्वविरहऊस्पचक्रयोपादेयदेयंतथा । मोरस्यंफलमत्र निर्वृतिमयं श्रीकल्पकल्पद्रुमे ॥४॥ नार्हतः परमो
देवो न मुक्तेः परमं पदं । न श्रीशत्रुंजयात्तीर्थं श्रीकल्पान्न परं श्रुतं ॥५॥ वाचनाश्रादाद्यदाना श्रवीद्धरश्च
तैरपि विधिनाराधिताः कल्पाः शिवदोऽतर्सवाष्टकमिति ॥६॥ तथात्र पर्युषणापर्वणि कल्पसूत्रश्रवणं चैत्यपरि
पाटी१ समस्तसाधुवंदनं२ सांवत्सरिकप्रतिक्रमणं३ मिथःसाधर्मिकक्षामणकं४ अष्टमंतपश्चेति एतानि
पंचकृत्यानि विधिज्ञैर्विधेयानीति । तत्र तपसि नागके तुकथानकं । अस्त्यत्र श्रीचंद्रकांतापुरी तस्यां च प्रब
लप्रतापवान् विजयसेन नृपतिः सकलपुरप्रधान श्रीकांतो नाम च श्रेष्ठी तस्य श्रीसखी च श्रीसखी
नाम्नी तयोरुपयाचितानां शतैः क्रमाज्जातः सुतः बहुवचतदासन्नं श्रीपर्युषणापर्वव्ययेऽष्ट
अष्टमंतपोस्मिन् पर्युषणापर्वणि करिष्यामः इति कुटुं बजल्पितं श्रुत्वा । स बालः संज्ञातजातिस्मृ
तिरष्टमंतपो विहितवान् । नरोदिति न स्तन्यं पिबति । ततः साश्रमता तत्र रक्षय श्रोष्कपचारश्च
तान्यवीकरत् परं निष्फलं न्यं जग्याद । ततो सौ मूर्छया तु अचेतनो जनि जीवंतमपि मृतधियानिधानमिव भू
र्दियस्तक्षं त्र्यास्तं तु विन्यघटत् । तदा धरणेंद्रस्य सिंहासनं तत्र प्रसाच वाल सोपि ज्ञातवांस्तस्य पूर्वस्तव दृष्टां
तं तथाहि अस्त्यत्र कापि संनिवेशे मृतमातृकोवणिक्पुत्रोऽपरमातृतः पराभवं प्राप्य यौवनस्थो सो मित्रा
याची कथन यदि पूर्वस्मिन् नस्क्षेतपः कृतं सावत्तदा त्रसत्वेप्राप्तत्वो नस्यादितिर्वक्रावति मित्रे सोपि यथाशक्यात
बालमातामरणं तमीमरणं चयोवनारसे पे रस्यपुरमरणं तित्रवीगीरस्थाइंतुस्वाहु ॥

पश्चात्के तातामातापमानौ संत्यज्य । तपस्येव लीनोऽस्तु । दन्यदा प्रदीपने जाते । स पड्यां दृढगुणो ग्रंथ ॥ २०
० यमिति मत्वा रण विमाता सुतेऽस्मिन् कुटीरके दग्धे वह्निज्वाभामगणयंस्तपसि लीनो मृत्वा श्रेष्ठिसु
तो जातोऽसौ पूर्वसंस्कारतः पर्युषणादिनं श्रुत्वा अष्टमं कृतवान् । स्तन्यं जीवन्नपि न त इति तदीयौ
ष्टौमो निद्रितोयाव तान म्रियते तावन्नं जीवयाम्यहमिति विचिंत्य धरणेंद्रः स्वप्नलावतस्तमरक्षत् । तदा च त
ज्जनकः स्वसुतमरणश्रवणादेव संजातहृदयसंघ ट्टाकृष्णान्मरणं प्राप । अपुत्रत्वेन च तद्द्रव्यं राजा ग्रहणा
य राज्ञा स्वपुरुषाः प्रेषिताः तदा च नागेंद्रो विप्र रूपं धृत्वा तान् निवारयामास । तैः राज्ञे कथितं राजापि
स्वयमेत्य विप्रीभूतं धरणेंद्रं पप्रच्छ च किं त्वं पैधं करोषि । तदा च स धरणेंद्रः कथं निर्वीरा
याः श्रियः सर्वस्वहरणे दयाहीनानलक्षसे मोघ द प्राचीनराज्ञां राजनीतिरियं निर्वीरायाः स्वाप
तेयं नृपतयो गृह्णंतीति । ततास्याः पुत्रको जीवन्नस्ति ति धरणेंद्रेणोक्ते राजाह क्वास्ति । ततः तन्मौ निरवा
तोऽस्तीति धरणेंद्रेणोक्ते राज्ञा चोद्घाटिते तस्मिन् बाले श्रीसखीकृदत्ती तमंदीधपत्तं करेकृत्वा पतेबाले ततः स्व
रूपं च स्वप्रायच्छति त्वद्य । धरणो बालाय हारं प्रदाय प्रणम्य यत्नेनायं पाल्यो महात्मोपकारायं भवितास्ति विध्यति स्वस्व
चतिरोदधे । राजापि तद्वार्तया प्रमोदं वहन् स्वगृहं गतः । पितुरौर्ध्वदेहिकं स्वजनैः कृतं । तस्य नागके
तु इति नाम दत्तं । ततः प्रभृति मापि बालकः स्वेतुः पर्वणि चतुर्थं चतुर्मासिके षष्ठं पर्युषणापर्वणि चाष्टमं कु

पर्व

वणिग्ग्रामवने ऽपि मान्मथं विकारं स्वप्नेऽपि न प्राप्तो जिनोक्तधर्मरतिर्व्रतानि सम्यक्पालयामास । अथैकदा
ऽचौरोपि चौरधिया रक्षपतिना चौरकलंकदानाद्धतः सोपि व्यंतरीभूय रक्षपं पार्ष्णिना । आहत्य नगरध्वंसा
य नगरप्रमाणां शिलां विकृत्य लोकान्त्रासयामास । तदा च मा भूदस्य जिनेंद्रप्रासादादीनां च ध्वंसो भव
तु इति ध्यायन् प्रासादमारुह्य नागकेतुः पतंतीं शिलां पाणिना दध्रे । व्यंतरोपि तत्तेजोऽसहिष्णुस्तां शिलां
संहृत्य तत्पादौ प्रणनाम । तच्च सारा ज्ञानं पट्टकृत्य ज्ञातः स्वाश्रयं च जगाम । इत्याद्यनेकधा उपका
रं कुर्वन्नेकदा जिनगृहे जिनपूजां कर्तुं गतः तत्र । च पुष्पस्थदंदशूकेन करांगुलौ दष्टः सोपि च
ज्ञातव्यतिकरः स्तमन्य उपसर्गा जिनेंद्रमूर्त्तेः पुरो ध्यानं सम्यगालंब्य तस्थिवान् ततो ध्यानारूढ
ःक्षपकश्रेणिमारूढो घातिकर्मचतुष्टयक्षयात् । संप्राप्तकेवलज्ञानः आसन्नदेवतादत्तलिंगोऽने
कान् प्रतिबोधयन् बहुकालं केवलिपर्यायं प रिपाल्य सिद्धिसौधमलंचकार नागकेतुमुनिः इह
लोके परलोके दुःप्राप्यं सा रक्षतमत्यंतं तत्र प्रमाद्युलसंस्था नपमितयत धंततोलव्याः इति नागकेतुकथा अष्टमत
पसिकविघटनाद्वेवं किं रत्नत्रयसेवनं किमथवाशल्यत्रयोन्मूलनं किं वाचित्र वचो वपुःकृतमलप्रक्षालनं स
वर्तीः किं जन्मत्रयपावनं किमसवद्धिस्थत्रयाग्यं पदं धन्यैर्यद्दितिकलाव पिजनैः पर्वोपवासत्रयं १ तदेवं
सप्तुपस्थिते पर्युषणापर्वणि अष्टमतपः पर्वो सकलोपद्रवविद्रावकस्य समग्रमंगलसंकेतनिकेतनस्य महा ८

नंदपरमनिदानस्य । महार्थनिधानस्य श्रीकल्पसूत्रस्य वाचनासावधानतया वश्यं । श्रवणीयेति कृतं प्रसंगेना
ऽथ प्रकृतं प्रस्तूयते । इति पीठिका । इह तावन्मंगलनिमित्तं पंचपरमेष्ठिनमस्कारमंगलमाह । नमो अरि
हंताणं । नमोऽर्हद्भ्यः शक्रादिकृतां पूजां सिद्धिगतिं चार्हंतीति अर्हतस्तेभ्यः यतः अरिहंति वंदणनमंस
णाइं अरिहंति पूअसक्कारं सिद्धिगमणं च अरिहा अरिहंता तेण वुच्चंति १ नमः सिद्धेभ्यः सितं प्रभूतका
लेन बद्धं अष्टप्रकारं कर्म शुक्लध्यानाग्निना ध्मा तं भस्मीकृतं येस्ते निरुक्तिवशात् सिद्धास्तेभ्य
ः यथा दीहकालरयं जंतु कम्मं से सियमट्ठ हा सियं धंतंति सिद्धस्स सिद्धत्तमुवजायइ
एर्द्धि ॥ ३ नमः सिद्धं ॥ नमो अरिहंताणं ॥ नमो सिद्धाणं ॥ नमो आयरिआणं ॥ न
मो उवज्झायाणं ॥ नमो लोए सव्वसाहूणं ॥छ॥ ३ नमः आचार्येभ्यः स्वयं पंचविधाचार
वंतः ऽन्येषामपि तत्प्रकाशकत्वात् आचारे साधवः आ चार्यास्तेभ्यः यथा पंचविहमायारं आयरमा
णा तह पभासंता आयारं दंसंता आयरिआ तेण वुच्चंति ३ नमः उपाध्यायेभ्यः उपेत्य समीपमागत्य येभ्य
ःसकाशादधीयते इत्युपाध्यायास्तेभ्यः यथा बारसंगो जिणक्खाओ सज्झाओ कहिओ बुहेहिं तं उवइसंति जम्हा
उवज्झाया तेण वुच्चंति ४ नमो लोके सर्वसाधुभ्यः लोके मनुष्यलोके सम्यग्ज्ञानादिभिर्मोक्षसाध
काः सर्वसत्त्वेषु समाः इति साधवः सर्वे च ते स्थविरकल्पिकादिभेदभिन्नाः साधवश्चेति सर्वसाधवस्तेभ्यः य

व्वानिव्वाणसाहए जोए जह्मा साहंति साहूणो समा य सव्वभूएसु तह्मा ते सव्वसाहूणो ५ एष पंचनमस्कारो वि
धीयमानः पंचानामर्हदादीनां नमस्कारः सर्वाणि च तानि पापानि तानि तेषां विध्वंसकः सर्वेषां द्रव्यभाव
भेदभिन्नानां मंगलानां प्रथममिदमेव मंगलं चास्य चूलायां पंचसु पदेषु चतुस्त्रिंशदक्षरी अत्र चाष्टषष्टिर
क्षराणि नव पदानि अष्टौ च संपदो विश्रामस्थानानि तत्र सप्त एकैकपदा अंत्या तु द्विपदा अधिकारिणस्तु
पंचाप्यर्हदादयो मार्गप्रकाशकत्वादिभिः कारणैर्नमस्काराहाः मग्गे १ अविप्पणासो २ आयारे ३ विण

णमो पंचनमुक्कारो सव्वपावप्पणासणो । मंगलाणं च सव्वेसिं पढमं हवइ मंगलं
ब तेणं कालेणं तेणं समएणं ॥ ब बा॥

य यावत्सूत्रं पंचविघ्न
सुकारं कारमिपएद्विंदकृद्दि १ इत्यक्षरार्थः ॥ अत्र कल्पाध्ययने त्रयं वाच्यं जिन
चारित्राणि स्थविरावली पर्युषणासामाचारी च तत्रापि वर्द्धमानतीर्थाधिपतित्वेन आसन्नोप
कारित्वात् प्रथमं श्रीवर्द्धमानचरित्रमाहुः श्रीभद्रबाहुस्वामिपादाः तेणं कालेणं ति प्राकृतशैलीव
शात् तस्मिन् काले वर्त्तमानावसर्पिण्याः चतुर्थारकलक्षणे एवं तस्मिन् समये तद्विशेषे यत्रासौ
भगवान् देवानंदायाः कुक्षावतीर्णः णंवाक्यालंकारे अथवा सप्तम्यर्थे आर्षत्वात् तृतीयैवेयं देवाणाततस्तेनका
लेन तेन समयेन हेतुभूतेनेति व्याख्येयं अथ तच्छब्दस्य सर्वपरामर्शित्वात् कन्तदा किं परामृशति ३॥ ८

तिचेत् यौ कालसमयौ श्रीऋषभादिभिः श्रीवीरस्य च्यवनादीनां वस्तूनां देववत्त्वेन कथितौ तावेव शूमः श्र
मणः तपस्वी भगवान् समग्रैश्वर्ययुक्तो महावीरः कर्मशत्रुजयाद्यन्वर्थनामा हस्तादुत्तरो यासां ताः हस्तो
त्तराः उत्तराफाल्गुन्यः अथवा हस्तादुत्तरस्यां दिशि वर्त्तमानत्वात् हस्तोत्तराः उत्तराफाल्गुन्यः तास्वथ पंचसु स्था
नेषु यस्य स पंचहस्तोत्तरः इदं वीरविशेषणं निर्वाणस्य स्वातौ जातत्वात् तत्र तत्र स्थानव्याख्यानमनागमिकं अ
गमिस्थानानामेव व्याख्यातत्वात् तत्र तथाहि पंचह त्थोत्तरे होत्था त्ति आचारांगे तट्टीका यथा हस्तउत्तरो

समणे भगवं महावीरे पंचहत्थुत्तरे हो त्था तं जहा हत्थुत्तराहिं चुए चइत्ता गब्भं व
क्कंते हत्थुत्तराहिं गब्भाओ गब्भं साहरिए २॥ हत्थुत्तराहिं जाए ३ हत्थुत्तराहिं मुंडे भ
वित्ता अगाराओ अणगारियं पव्वइए ४ हत्थु त्तराहिं अणंते ॥

यासामुत्तरफाल्गुनीनां
ताः हस्तोत्तरास्तास्वथ पंचसु स्थानेषु गर्भाधानसंहरणजन्मदीक्षाज्ञानोत्पत्तिलक्षणेषु संवृत्ता अत
पंचहस्तोत्तरो भगवान् अन्नहित्थयं अत्र पंचसु स्थानेषु इत्येव व्याख्यातं न पुनः कल्याणकेष्विति स्वयमेवा
लोच्यं हत्थुत्तराहिं ति हस्तोत्तराभिः उत्तराफाल्गुनीभिः चंद्रयोगमुपगताभिः चुतो देवलोकात् चुत्वा च गर्भं व्युत्क्रांतः उ
त्पन्नः गर्भाद्गर्भं साहरिए त्ति संक्रामितः जाए त्ति जातः योनिवर्त्मना निर्गतः मुंडे त्ति द्रव्यतो भावतश्च द्रव्यतः केशलोचनतः भाव
तः क्रोधाद्यपनयनतः अगारात् गृहात् निःक्रम्य इति शेषः अनगारितां साधुतां प्रव्रजितः प्रकर्षेण गतः अनंतं अनंतार्थविषयत्वात्

डाक्टर भाऊदाजी इत्यस्य साधकम्
DR. BHAU DAJI
MEMORIAL

अनुत्तरं सर्वोत्तमत्वात् निर्व्याघातं व्याघाताभावात् निरावरणं क्षायिकत्वात् कृत्स्नं सकलार्थग्राहकत्वात् प्रतिपूर्णं सकलस्वांशसमन्वितत्वात् पौर्णमासीचंद्रमंडलवत् केवलं असहायं अत एव वरं ज्ञानं दर्शनं चेति तत्र विशेषावबोधरूपं ज्ञानं सामान्यावबोधरूपं दर्शनं गिम्हाणं तिग्रीष्मस्य ग्रीष्मे बहुत्वं वार्षत्वात् छट्ठीपक्खेणं ति कथित्याः तत्र दिनरात्रिरूपं अहोरात्रस्य उभयपक्षत्वात् पश्चात् अहोरात्रस्य रात्रौ म

अणुत्तरे निव्वाघाए निरावरणे कसिणे पडिपुन्ने केवलवरनाणदंसणे समुप्पन्ने साइ णापरिनिव्वुए स्यवं तेणं कालेणं तेणं समएणं समणे भगवं महावीरे जे से गि म्हाणं चउत्थे मासे अट्ठमे पक्खे आसाढसुद्धे तस्स णं आसाढसुद्धस्स छट्ठी पक्खेणं महाविजयपुप्फोत्तरपवरपुंडरीआओ महाविमाणाओ वीसं सागरोव मट्ठितिआओ आउक्खएणं भवक्खएणं ठिइक्खएणं अणंतरं चयं चइत्ता इहेव जं बुद्दीवे दीवे भारहे वासे दाहिणड्ढभरहे इमीसे ओसप्पिणीए सु॥५॥

लानुविजयोयत्र तथाविधं च तत् पुष्पोत्तरं च वरश्चासौ प्रधानत्वात् ग्राश्रितं पुष्पोत्तरसंज्ञितं च तदेव प्रवरं पुंडरीकं विमानानां मध्ये उत्तमत्वात् आउक्खएणमित्यादि आयुर्देवायुष्कं स्थितिः आहारो वैक्रियशरीरावस्थानं वा अनंतरं अव्यहितं अवेच्यवनं विधा कृत्वेत्यर्थः अथवा अनंतरं देवभवसंबंधिनं वयशरीरं त्यक्त्वा इहेवत्ति देशतः प्रत्यासन्नत्वे न पुनरसंख्येयत्वाज्जंबूद्वीपानामन्यत्रेतिभावः॥

४२,०००वर्ष ७५वर्ष ८॥मास एकऊणोपाकं

दुसमेति छिचत्वारिंशत्सहस्रवर्षैः पंचसप्ततिवर्षैः सार्धाष्टमासैर्हीने कोटाकोटिपरिमिते चतुर्थारके बहुव्यतीते दोहिअत्ति मुनिसुव्रतनेमी पूर्वतीर्थकृत्त्रिदिष्टः पूर्वतीर्थकरैर्ऋषभाद्यैः यामे शक्रेदशमरीचि रमरीचेः पार्श्वेः परिव्राट् एषः संसारो बहुविस्तरः तीरमगरोनारायणोनारकः सिंहोनरथिको देवेषु बहुशास्त्रकीर्तिः

समसुसमाए समाए विइक्कंताए १ सुसमाए समाए विइक्कंताए २ सुसमदुसमाए समाए वि इक्कंताए ३ दुसमसुसमाए समाए बहुवि इक्कंताए ४ सागरोवमकोडाकोडीए बायाली सवाससहस्सेहिं ऊणिआए पंचहत्तरीए वा सेहिं अद्धनवमेहिं अ मासेहिं सेसेहिं इक्क वीसाए तित्थयरेहिं इक्खागकुलसमु प्पन्नेहिं कासवगोत्तेहिं दोहि अ हरि वंसकुलसमुप्पन्नेहिं गोअमसगोत्तेहिं ते वीसाए तित्थयरेहिं विइक्कंतेहिं समणे भग वं महावीरे चरिमतित्थयरे पुव्वतित्थयरनिद्दिट्ठे माहणकुंडग्गामे नयरे उसभदत्तस्स माहणस्स को डालसगुत्तस्स भारिआए देवाणंदाए माहणीए जालंधरसगोत्ताए पुव्वरत्तावरत्तकालसमयंसि॥

मरीच
वेदना३३२५ २८ २७
नंदनः श्रीपुष्पोत्तरनिर्जरावतुलवाटीरग्निलोकीगुरुः २२ वंशकृत् पूर्वनिर्दिष्टः कथितः माहणत्ति माहनानां कुंडग्रा यत्र तात्यत्र भवासो ग्रामश्च करालावत्ते नगरं तत्र कोडालेः समानं गोत्रं यस्येति एवं जालंधरसगोत्ताए इत्यादावपि पूर्वरात्रस्या सौ अपररात्रश्च पूर्वरात्रावररात्रः स एव कालल्लक्षणः समयो न तु सामाचारादिलक्षणः पूर्वरात्रापररात्रकालसमयस्तत्र मध्यरात्रे इत्यर्थः

२०

आर्षत्वाच्चात्रिकरेफलोपः अपरात्रश्चाष्टोवार्यं अर्द्धगतसर्वगतमितिन्याया दपगतारात्रिः अपरात्रः योगं अमी
चंद्रेणसह आहारव्यक्कांत्या देवाहारपरित्यागात् अथवा मनुष्योचिताहारग्रहणेनेत्यर्थः एवमन्यदपिप
दद्वयं अक्कौगइतियाव्युत्क्रांता संक्रांतः यद्यपिदेवानां षण्मासावशेषायुषां मात्स्यंम्लानिः कल्पद्रुमप्रकं
पः श्रीह्रीनाशो वाससांचोपरागः दैन्यंतंद्राकामरागांगभंगो दृष्टेर्भ्रांतिर्विपत्स्थारतिश्चेतिलावाज्ञायंते तथा
पितीर्थंकराः पुण्योत्कर्षात् कांतिविज्ञानादियुक्तासर्वंतिष्ठावनंसविष्यकालंभगवान्जानाति च्यवमानस्तु

हुत्तरादिं नरकत्तेणंजोगमुवागएणं आहारवक्कंतीए भववक्कंतीए सरीरवक्कंतीए कुच्छिंसि गब्भत्ताए वक्कंते २ समणे भगवं महावीरे तिन्नाणोवगए आवि होत्था चइस्सामित्ति जाणइ चयमाणे न याणइ चुएमित्ति जाणइ जंरयणिंच णं समणे भगवं महावीरे देवाणंदाए माहणीए जालंधरसगोत्ताए कुच्छिंसि गब्भत्ताए वक्कंते तं रयणिंच णं सा देवाणंदा माहणी सयणिज्जंसि सुत्तजागरा ओहीरमाणी २ इमेएयारूवे उराले कल्लाणे

नजानाति च्यवनस्यैकसामयिकत्वेनसूक्ष्मत्वात् छाद्मस्थिकज्ञानत्रयस
त्वात् जंरयणिंचेतियस्यांरजन्यां सुत्तजागरेति नातिसुप्ता नातिजाग्रतीइति किमुक्तंभवति तनायत्यागरि
स्यजघन्यतोप्यांतर्मुहूर्त्तिकत्वात् च्यवनकालंभगवान्नजानाति च्युतोस्मीतिजानाति ओहीरमाणी ईषन्नि ११
द्रां गच्छंतीत्यर्थः इमान्वक्ष्यमाणानितिसंबंधः एतादृक्स्वात्स्वभावितस्वरूपान् एषांनकविकृतंन्स्व
नमंथिकंवातततथातान् उदारान्प्रधानान् कल्याणान् क॥

ल्याणानांस्वसमृद्धिविधायिमाणां कारणत्वात्कल्यंकनीरोगत्वे अणंतिगमयंतिकल्याणास्तान् शिवानुपद्रवो
पशामहेतुत्वात् धन्यान् धर्मधनप्रापकत्वात् मंगल्यान् मंगलेदुरितोपशमे साधुत्वात् सश्रीकान् सशोभानि
ति प्रेक्ष्यप्रतिबुद्धा गयवसहगाहा अभिषेकः श्रियाः संबंधी पद्मोपलक्षितंसरः पद्मसरः विमानाकारंभ
वनं विमानभवनं अथवायोदेवभवात्दवतरति तन्मातांविमानंपश्यति यस्तुनरकाडुद्धृत्योत्पद्यते तन्मा

सिवे धन्ने मंगल्ले सस्सिरिए चउद्दसमहासुमिणे पासित्ताणं पडिबुद्धा ३ तंजहा गय१ वसह२ सीह३ अभिसेअ४ दाम५ ससि६ दिणयरं७ झयं८ कुंभं९ पउमसर१० सागर११ विमाणभवण१२ रयणुच्चय१३ सिहिं च१४ २ तएणं सा देवाणंदा माहणी इमेएआरूवे उराले कल्लाणे सिवे धन्ने मंगल्ले सस्सिरीए चउद्दसमहासुविणे पासित्ताणं पडिबुद्धा समाणी हट्ठतुट्ठचित्तमाणंदिआ पीइमणा परमसोमणसिआ हरिसवसविसप्पमाणहिअया॥

तांभवनमितिच उर्द्दशोपतिस्वप्नाः विमानभुवनयोरेकतरद
र्शनात् रत्नोच्चयोरत्नस्तंभाले शिखीनिर्धूमोग्निः अग्रेपश्यपहट्ठतुट्ठा अत्यंतंतुष्टा अथवा हृष्टाविस्मिता तुष्टाता
षवतीचित्तमाणंदिअत्तिचित्तेनानंदिता आनंदितंवाचित्तंयस्याःस्याचित्तानंदितामकारः प्राकृतत्वात् अथवाहृष्टंविस्मि
तं तुष्टंतोषवच्चित्तंयत्रतत्तथा तद्यथाभवतिएवमानंदिताप्रीतिः प्रीणनं आप्यायनंमनसियस्याःसाप्रीतिमनाःपरमंसौम
नस्यं जातमस्याः परमसौमनस्यिताहर्षवशेनविसर्प्पिविस्तारयायिहृदयंयस्याःसातथा॥

धाराभिर्धाराधरप्रावृडर्त्ततालिः आहतंदत्तेवा यत्कदंबपुष्पंतदिव समुच्छ्वसितानि उच्छ्रितानिरोमाणिरूपाण्युप
रोमरंध्राणियस्याः यद्यप्येतानि अर्थातान्यत्रयोरेतत्संशितयाप्रियुक्तिरूपत्वात् प्रमोदप्रकर्षसूचितिपादना
र्थत्वाद्धनायुक्तानि सुमिणुग्गहंति स्वप्नानामवग्रहणं स्मरणंकरोति विशिष्टफललाभोरोगप्रराज्या
दिकंविभावयतीत्यन्ये अतुरियत्ति मानसौत्सुक्याभावेन अचपलंकायतः असंभ्रांतया अस्खलंत्या

धाराहयकयंबपुप्फगंपिवसमुस्ससियरोमकूवा सुमिणुग्गहंकरेइ२त्ता सयणि
ज्जाउअब्भुट्ठेइ अब्भुट्ठित्ता अतुरिअमचवलमसंभंताए अविलंबिआए
रायहंससरिसीएगईए जेणेवउसभदत्तेमाहणे तेणेवउवागच्छइ
उवागच्छित्ताउसभदत्तंमाहणंजएणंविजएणं वद्धावेइ वद्धावित्ता आस
त्था विसत्था सुहासणवरगया करयलपरिग्गहिअं सिरसावत्तं॥

अविलंबि आएत्ति कचित्त्वा विलंबितया अविच्छिन्नया राजहंससति राजहंसगतिसदृश्यागत्या
जयः परैरनभिभूयमानता प्रतापवृद्धिश्च विजयः परेषामसहमानानामभिभवः अथवा जयः स्वदेशे विजयः परदे
शेतास्यांवर्द्धापयति ततः किंकृतवती आस्वस्था गतिजनितश्रमाभावात् विश्वस्था संक्षोभाभावात् अनुत्सुका सुखेनसु
खेनवा शुभेनवा आसनवरेगतायासाकरतले त्यादिकरतलाभ्यां परिगृहीतं आवर्त्तं शिरस्य

वर्त्तनं प्रादक्षिण्येन भ्रमणं यस्य सशिरसावर्त्तस्तं दशनखं अंजलिं मुकुलितकमलाकारं मस्तके कृत्वा एवम
वादीत् देवानांप्रिय सरल अथवा देवानप्यनुरूपं प्रीणाति इतिदेवानुप्रियो नान्ये इतिवितर्कार्थे निपा
तः क्वोनुमन्ये कोनुकल्याणः फलवृत्तिविशेषो भविष्यति सोच्चनिशम्य श्रोत्रेणनिशम्य हृदयेनावधार्य

दसनहं मत्थए अंजलिंकट्टु एवंवयासी एवंखलुअहं देवाणुप्पिआ अज्जसयणि
ज्जंसिसुत्तजागरा उहीरमाणी२ इमेएआरूवे उराले जावसस्सिरीए चउद्दसमहासुमिणे पा
सित्ताणंपडिबुद्धा ६ तंजहा गयवसह२गाहा॥ एएसिंणंदेवाणुप्पिआ उरालाणं जा
वचउदसण्हंमहासुमिणाणं केमन्नेकाल्लाणेफलवित्तिविसेसे भविस्सइ तएणं
से उसभदत्तेमाहणे देवाणंदाएमाहणीए अंतिएएअमट्ठं सोच्चानिसम्म ह
ट्ठतुट्ठजावहिअए धाराहयकयंबपुप्फगंपिवसमुस्ससिअरोमकूवे सुमिणुग्गहं
करेइ२त्ता ईहंअणुपविसइ२त्ता अप्पणो साभाविएणं मइपुव्वेणं बुद्धिविन्नाणेणं तेसिं
सुमिणाणंअत्थुग्गहंकरेइ२त्ता देवाणंदं

सुमिणुग्गहंति स्वप्नानामवग्रहमर्थावग्रहणं ततः ईहांसदर्थपर्यालोचनल
क्षणामनुप्रविशति आत्मसंबंधिना स्वाभाविकेनसहजेन मतिपूर्वेणाभिनिबोधप्रभवेन बुद्धिविज्ञानमतिविशेष
जातौत्पत्तिक्यादिबुद्धिरूपपरिच्छेदेनअथवाबुद्धिःसांप्रतदर्शिनी विज्ञानं अतीतानागतवस्तुविषयं यतः मतिरागामिवि
षया बुद्धिःसांप्रतदर्शिनी अतीतार्थास्मृतिर्ज्ञेया प्रज्ञाकालत्रयात्मिका अर्थावग्रहं स्वप्नफलनिश्चयं करोति॥

१२

आरोग्यंरोगाभावः तुष्टिःसंतोषः दीर्घायुश्चिरजीविता अर्थलाभ इत्यादिषु लभिष्यतीतिशेषः एवंखलु
त्ति एवंरूपाद्युक्तफलसाधनसमर्थात् स्वप्नाद्दारकं प्रजनिष्यसीतिसंबंधः तस्यापसर्गा सकर्म्मकोजनिश्च
ते सूजपडिपुन्नाणंति अतिपूर्णेषु पक्षाः समस्पर्शात् अर्द्धाष्टमंयेषु तान्यर्द्धाष्टमानि तेषुरात्रिंदि
वेषुद्दोरात्रेषु व्यतिक्रांतेषु अहीणेत्यादि अहीनानिस्वरूपतः प्रतिपूर्णानि पंचेंद्रियाणियत्रतत्तथा ताद्दृ

माइणिएवंवयासी ८ उरालाणंतुमे देवा णुप्पिए सुमिणादिट्ठा कल्लाणाणं सिवाध
न्ना मंगल्ला सस्सिरिआ आरुग्गतुट्ठिदी हाउकल्लाणमंगल्लकारगाणं तुमेदेवा
णुप्पिए सुमिणादिट्ठा अत्थलाभोदेवा णुप्पिए भोगलाभोदेवाणुप्पिए पुत्तल
ाभोदेवाणुप्पिए सुक्खलाभोदेवाणुप्पिए ए वंखलुतुमंदेवाणुप्पिए नवण्हंमासाणं ब
हुपडिपुन्नाणं अद्धट्ठमाणराइंदिआणंवि इक्कंताणं सुकुमालपाणिपायं अहीण
पडिपुन्नपंचिंदिअसरीरं लक्खणवंजणगुणोववेअं॥ शंखचक्रादयस्य सत्तथालेलक्खण

स्त्यादि लक्षणानि चक्रवर्त्तितीर्थंकृतामष्टोत्तरसहस्रं बलदेववासुदेवानामष्टोत्तरशतं तदितरेषां
भाग्यवतां पुंसां द्वात्रिंशत्तानिचामूनि छत्रं १ तामरसं २ धनू ३ रथवरो ४ दंभोलि ५ कूर्म्मो ६ अंकुश ७ वापी ८ स्वस्तिक ९ तो १३
रणानि १० सरः ११ पंचाननः १२ पादपः १३ चक्रं १४ शंखः १५ गजो १६ सागरः १७ कलशो १८ प्रासाद १९ मत्स्य २० यवाः २१ यूप २२ स्तूप
२३ कमंडलू २४ न्यवनिभृत् २५ सच्चामरो २६ दर्पणः २७ २ उक्षा २८ पताका २९ कमलाभिषेकः ३० सुदाम॥

[illegible] स्वस्तिक [illegible] ॐ [illegible] चक्र [illegible]
[illegible]

[illegible] इक्षुर [illegible]

म ३१ केकी ३२ घनपुण्यभाजां पुराकृतैः पुण्यगणैरमूनि सल्लक्षणानीतिवदंतिधीराः॥ १ इत्यादियेषोऽप्य
लक्षणानां सहस्रमष्टोत्तरमंगवर्त्तीति पाठांतरं अथवाऽऽद्येषु वतिसमरक्षाः ७ षडुन्नताः ६ पंचसूक्ष्मपदी
र्घाः ५ त्रिविपुलत्र लघुत्रगंभीरा ३ द्वात्रिंशल्लक्षणाः सपुमान् १ नख १ चरण २ पाणि ३ रसना ४ दशनच्छद
५ तालु ६ लोचनांत ७ ७ स्याद्योरक्तः सप्तसु ससौख्यं समलभते लक्ष्मीं २ षट्ंकक्षा १ वक्षः २ कृकाटिका ३ नासिका
४ नख ५ आस्य ६ मिति यस्येदमुन्नतं स्यात् दुन्नतयस्तस्यतं यत्ते ३ दंत १ त्वक् २ केश ३ अंगुलिपर्व ४ नखं ५ च
तिपंचसूक्ष्माणि धनलक्ष्म्याः एतानि प्रसवंतिप्रा यज्ञाः पुंसां ४ नयन १ कुचांतर २ नासा ३ हनु ४ भु
ज ५ मितियस्यपंचकंदीर्घं दीर्घायुर्वित्तपरः परा क्रमीजायतेसनरः ५ भाल १ उरो २ वदनमिति
त्र त्रितयंत्रमीस्तीर्णस्यविपुलंस्यात् ग्रीवा १ जंघा २ मेहनं ३ मितित्रयंलघुमहीशस्य ६ यस्यस्व
रो १ नाभिः २ सत्त्वं ३ मितीदंत्रयंगभीरंस्यात् सप्ता बुधिकांच्यामपि श्रामःसकरग्रहंकरोति ७ सुवर्णं ×म×
शरीरस्य सर्वत्रासुखसत्त्यात ततोऽपिनासिकाश्रेष्ठा नासिकायाअपिलोचनं ८ यथानेत्रंतथाशीलंयथा
नासा तथार्जवं यथारूपंतथावित्तं यथाशीलंतथागुणाः ९ गतः १ शब्दस्य तत वर्ण २ सत्त्वं स्नेहो ३ स्तस्वर ४ अंत
स्तेजइतः सत्त्वं सिद्धं द्वात्रिंशताधिकं १० अस्थिष्वर्थाः सुखं मांसे त्वचि भोगाः स्त्रियोक्षिषु गतौयानं स्वरेचा
ज्ञा सर्वंसत्त्वेप्रतिष्ठितं ११ पद्मवज्रांकुशच्छत्र शंखमत्स्यादयस्तले पाणिपादेषुदृश्यंते यस्यासौश्रीप

तिः पुमान् ॥ १२ ॥ उन्नताः पृथुलास्ताम्राः स्निग्धा दर्पणसंनिभाः ॥ नखा भवंति धन्यानां धनभोगसुखप्रदाः
॥ १३ ॥ सिताः श्रमणानां ज्ञेया रूक्षाः पुष्पितकाः पुनः ॥ जायंते किल दुःशीलो नखैर्लेखांकितैर्मानवः ॥ १४ ॥ स्वच्छा
॥ समाः शिखरिणो दंताः स्निग्धा घनाः शुभाः ॥ विपरीताः पुनर्ज्ञेया नराणां दुःखकारकाः ॥ १५ ॥ द्वात्रिंशद्दशनो राजा
भोगी स्यादेकहीनकः ॥ त्रिंशता मध्यमो ज्ञेयस्ततोऽधस्तान्न सुंदरः ॥ १६ ॥ स्तोकदंता अतिदंताश्च श्यामदंताश्च ये नराः
॥ मूषकैः समदंताश्च ते पापाः परिकीर्तिताः ॥ १७ ॥ अंगुष्ठजविराढ्याः श्रुतवंतोंगुष्ठस्थलजैश्च यवैः नचीकि
ताशाखा पाणितलस्य तिधनाढ्यः ॥ १८ ॥ वाम रवर्तोस्ति यस्य वामायां दिशि मस्तके निर्ल
क्षणः क्षुधाक्षामो भिक्षामद्यात्सरूक्षकः ॥ १९ ॥ दक्षिणो दक्षिणे भागे यस्यावर्तः शुभमस्तके
तस्य नित्यं प्रजायते कमलाकरवर्तिनी ॥ २० ॥ यदि स्याद्दक्षिणे वामो दक्षिणो वामपार्श्वकेः
पश्चात्काले ततस्तस्य भोगो नास्त्यत्र संशयः ॥ २१ ॥ पंचभि ॥ शतमुद्दिष्टं चतुर्भिर्नवतिस्तथा ॥ त्रिभिः षष्टिः समुद्दि
ष्टा ॥ लेखाभिर्भालवर्तिभिः ॥ २२ ॥ चत्वारिंशत्पुनः प्रोक्ता वर्षाणि नरजीवितं ॥ द्वाभ्यामाभ्यां तथैकेन त्रिंशद्वर्षाणि
जायते ॥ २३ ॥ दातोन्नततले पाणौ निम्ने पित्र्यधनोज्झितः ॥ धनी संवृतनिम्नः स्याद्विषमे निर्धनः पुमान् ॥ २४ ॥ आरक्तं
वक्रारक्तं वा येषां पाणितलं वर्णं ॥ तस्य रत्नायुषोनित्स्वा दुःखिनो नात्र संशयः ॥ २५ ॥ दीर्घनिर्मांसपर्वाणः
सूक्ष्मा दीर्घाः सुकोमलाः ॥ सुघनाः सरलावृत्ताः श्रीमतोऽंगुलयः प्रियाः ॥ २६ ॥ ब ॥ अना ॥ १४

Dr. BHAU DAJI MEMORIAL

मिकांत्यरेखायाः कनिष्ठा स्याद्यदाधिका ॥ धनवृद्धिस्तदा पुंसां मातृपक्षो बहुस्तथा ॥ २७ ॥ मणिबंधात्पितुर्ले
खा करभाद्विभवायुषोः ॥ लेखे द्वे यांति तिर्यक्तोपि तर्जन्यंगुष्ठकांतरं ॥ २८ ॥ येषां रेखा इमास्तिस्रः संपूर्णा दोषवर्जिताः ॥
तेषां गोत्रधनायूंषि संपूर्णान्यन्यथा न तु ॥ २९ ॥ उल्लंघ्यंते च यावंत्यो गुल्यो जीवितरेखया ॥ पंचविंशतयो ज्ञेया
स्तावंत्यः शरदो बुधैः ॥ ३० ॥ मणिबंधेषु रेखाश्चायुर्लेखायां ये तु पल्लवाः ॥ संपदस्ते बहिर्ज्ञेया विपदोंगुलिसं
न्मुखाः ॥ ३१ ॥ नद्दीरेखा मणिबंधाद् दृश्यगासा तु पंचधा ॥ अंगुष्ठाश्रयिणी सौख्य ॥ राज्यलाभाय जायते ॥ ३२ ॥

॥ माणुम्माणपमाण पडिपुन्नसुजाय ॥

राज्ञा राजसमः क्षोवा तर्जनीगतया तया मध्यमांगतया चार्थी ख्यातो राजा प्रसेन्यपः ॥ ३३ ॥
अनामिकां प्रयात्यां तु सार्थवाहो महाधनः ॥ कनिष्ठांगतया श्रेष्ठः सप्ततिष्ठोस्तवेष्वेवं ॥ ३४ ॥ यवैरंगु
ष्ठमध्यस्थैर्विद्याख्यातिविभूतयः ॥ शुक्लपक्षे तथा जन्म ॥ दक्षिणांगुष्ठगैर्यवैः ॥ ३५ ॥ इत्यादीनि व्यंजनानि मषीति
लकादीनि ॥ तेषां यो गुणः प्रशस्तता तेनोपपेतो युक्तो यः स तथा अथवा सद्व्यंजनलक्षणं पश्चाद्द्वंद्वं व्यंजनं गुणोपेता ॥
स्मादयः माणुम्माणेति जलेनातिभृते कुंडे प्रमाणयुक्तपुरुषनिवेशने यज्जलं निःसरति तद्यदि द्रोणमानं स्यात्तदा स पुरु
षो मानान्वितः ॥ कथ्यतेऽतिमानं तुलारोपितः पुमान् यद्यर्द्धभारं तुलति तदोन्मानप्रमाणं स्यात् तत्र भारमानं त्वेवं ॥ त्रिगुंजा

निवचोविदूरबालःसोलवा...गदिश्चाणेषचासेगदिश्चाणेस्तेर२तिनस्तेरं१मूल रुवी२०दसेमणेएकधमी दृसधमा

निर्ममिचह्यो गद्याणेतेचषो डशाः रक्तमाणेस्तैःस्मृतास्ते स्तैस्त्रिभिर्निर्मितुच्यते १ दशाशितैर्निष्टीख्याता सारेताःसं
मितादशा तदर्द्धंचतुर्पुमनिं प्रायशःपुण्यशालिनां पतच्छारमानेन पादोना अष्टमणाःकिंचिदधिकाज्ञायंत
तदर्द्धंतु साधिकपंचसेराधिकानिमादोन चतुर्मणानीति सारार्द्धमानं कल्पकिरणावल्यांतु षट्सर्षपैर्यवस्त्रिके
र्गुंजैकाचयविस्त्रिभिः गुंजात्रयेणवल्लःस्या गद्याणेतेचषोडश २ पलेचदशगद्याणा स्तेषांसार्द्धशतंमणि मणो
दशासितरकाच धटिकाकथिताबुधैः २ धटिभिर्दशभि स्तासि रेकोभारःप्रकीर्त्तितः इतिभारमानंप्रोक्तं तद्वित्य
याताऽस्मिन् भारक्षेष्टसप्तनिर्मिताःसाधिकाःस्फ। स्तदर्द्धं चेकोनचत्वारिंशन्मणमितंसारार्द्धमितिक

सव्वंगसुंदरंगं ससिसोमाकारं कंतंपि अदंसणं सरूवंदारयंपयाहिसि ७
सेविअणंदारए उम्मुक्कबालभावे ॥

धमेतीवडुन्मानंशरीरस्यसंभवतीति यश्चस्वांगु
लिरष्टोत्तरशतांगुलोच्चः सप्रमाणोपेतः इत्येवरोषोत्तम पुरुषाणांलक्षणं यदुक्तं अष्टशतंशष्टषस्तवतिंच
दयरिमाणंचतुरशीतिधरितिपुंसां उत्तमरमसरहीनानांच स्वदेहसंख्यास्वमानेनेति तीर्थकृतांतुद्वादशांगुलमु
स्त्रीषंभवतीति तस्वांगुलेर्विंशत्युत्तरशतांगुलप्रमाणाःस्फः ततश्चणतिर्मानादिभिःअतिशस्तीनि अन्यूनानि सुजातानि
सुनिष्पन्नानि सर्वाण्यंगानि शिरःप्रभृतीनियस्मिं स्तत्तथाविधंसुदरं अंगंशरीरंयस्यसतथातं कांतं कमनीयं अतए
वप्रियं द्रष्टृणांदर्शनंयस्यसतथातंसविअत्रिणमितिवाक्यालंकारसोपिदारकः उम्मुक्कबालभावसंजातःप्रवर्धः॥ ॥

विण्णायपरिणयमित्ते जुव्वणगमणुपत्ते रिउव्वेअ जउव्वेअ सामवेअ अथव्वणवेअ इतिहासपंचमाणं निग्घंटुछट्ठाणं सगोवंगाणं सरहस्साणं चउण्हंवेआणं सारगपारए धारए सडंगवीसट्ठितंतविसारए संखाणे॥ ॥

विण्णायत्ति विज्ञानंपरिणतमात्रंयस्यसतथातं कचिद्विण्णपरिणयमित्तेत्तिपाठ स्तत्रविज्ञएवविज्ञकः सचासौप
रिणतमात्रश्च बुध्यादिपरिणामवानेव विज्ञकपरिणतमात्रः इदमात्रशब्दोबुध्यादिपरिणामस्याभिनवत्वख्याप
नापरः त्योचनमनुप्राप्तः रिउव्वेयत्यादि ऋग्वेदयजुर्वेदसामवेदाथर्वणवेदानां इतिहासपंचमानां पुराणानि ज्ञानादिति
साऽपुराणं तानिचामूनि ब्रह्मपाद्मदश विष्णुवायुभागवतसंज्ञंपततोनारदंद मार्कंडेय७ महाग्निदेवतमितिप्रोक्त
मंलविष्यंतथा९ तस्माद्ब्रह्मवैवर्तसंज्ञकंदितं१० लिंगं११ वराहं१२ स्कांदं१३ वामन१४ मत्स्य१५ कूर्म१
६ गरुडं१७ ब्रह्मांडमष्टादश१८ १ निर्घंटुर्नामकोशः ॥ अंगानि शिक्षादीनिषट्उपांगानि तदुक्तप्रपंचनप
राःप्रबंधाःसरहस्यानां ऐदंपर्ययुक्तानामित्यर्थः चतुर्णां वेदानां सारकोऽध्यापनद्वारेण प्रवर्त्तकः ग्रंथा४०० स्म
रकोवा पारगःपर्यंतगामी धारकोऽधीतानुधारयितुंक्षमः षडंगवित् शिक्षादिविचारकः ज्ञानार्थत्वेनपुनरुक्तंस्यात् षष्टि
षष्टितंत्रं कापिलेयशास्त्रं तत्रपंडितः संख्याने संकलितव्यवकलितादिगणित स्कंधेसुपरिनिष्ठित
इतियोगः यथा अमलकमलराशेरंशः पंचांशपाष्टे त्रिनयनहरिसूर्यायनत्रयेणचार्यां गुरुपदमथषड्भिःशक्ति
तांशाषड्भिः सकलकमलसंख्यांक्षिप्रमाख्यादितस्य॥ ११२१ ह्वत्पद्मलक्षाकमलसंख्या १२० क्वचित्संख्याणेत्य
नंतरंसिरकाणेत्तिशाष्टपाठः शिक्षाअणतिप्रति॥ ॥ ३५६४ ॥ कल्पव्याकरणछंदज्योतिःशिक्षा...२

१५

कुल्पच्या रमलेने वी चमेर तु तारीरमान

ए रा कल्पारकेदि ६

8.२४२०३

पादयति। शिक्षाणं आचारोपदेशशास्त्रं षडंगवेदकत्वमेवव्यनक्ति। शिक्षा अक्षरनिरूपकं शास्त्रं कल्पस्तथाविधयज्ञादिसमाचारप्रतिपादकं शास्त्रं व्याकरणं शब्दलक्षणशास्त्रं तानि अष्टौ ऐंद्रं१ पाणिनि२ जैनेंद्रं३ शाकटायनं४ वामनं५ चांद्रं६ सरस्वतीकंठाभरणं७ बुद्धिसागरं८ २ विश्रांतविद्याधरं९ भीमसेनं१० कलापकं११ शब्दव्याकरणं१२ शैवं१३ गौडं१४ नंदिजयोत्पलं १५ २ सारस्वतं१६ सिद्धहेमं१७ जयादेमं१८ तथापरमिति अथवाष्टौ महाव्याकरणानि ब्राह्मं१ ऐशानं२ ऐंद्रं३ च प्राजापत्यं४ बृहस्पतिं५ त्वाष्ट्रं६ मापिशलं७ चेति पाणिनीयमष्टमं ८ छं

सिक्खाकप्पे वागरणे छंदे निरुत्ते जोइसामयणे अन्नेसु अ बंभन्नएसु परिव्वायएसु नएसु सु
परिनिट्ठिए आवि भविस्सइ २० तं उरालाणं तुमे देवाणुप्पिए सुमिणा दिट्ठा जाव आरुग्गतु
ट्ठिदीहाउअमंगल्लकारगा णं तुमे देवाणुप्पिए सुमिणा दिट्ठ त्तिकट्टु भुज्जो २ अणु
वूहइ २१ तएणं सा देवाणंदा माहणी उसभदत्तस्स माहणस्स अंतिए एअमट्ठं सोच्चा निस
म्म हट्ठतुट्ठ जाव हियया करयलपरिग्गहियं दसनहं सिरसावत्तं मत्थए अंजलिं कट्टु उसभद
त्तं माहणं एवं वयासी २२ एवमेयं॥

दः पद्यलक्षणं शास्त्रं निरुक्तं पदभंजनं ज्योतिषां ग्रहादीनां अयने सर्वेगित्यर्थः ज्ञानार्थं हिति ज्ञान ज्योतिः शास्त्रे इत्यर्थः अन्येषु च ब्राह्मणहितेषु ग्रंथेषु सुपरिनिष्ठितः सुनिष्णातश्च भविष्यति क्वचिदेतदनंतरं परिव्रायगेसु नएसु वा तत्र परिव्राजकसत्कनयेषु आचारेषु न्यायशास्त्रेषु चेति लाभ्यं नमिति यस्मादेवं तस्मादुदारादिविशेषणाः उमे त्वया स्वप्ना दृष्टा इतिकट्टु इत्युक्त्वा द्वयोः उपबृंहयति प्रशंसयति एवमेअमित्यादि एवमेतदिति प्रतिवचने प्रत्ययाविसंवादनं तदेव विशेषयति॥ १६

तहमेअंति तथैव यथा भवंतः प्रतिपादयंति अवितहमेतद् अनेन व्यतिरेकाभावतो असंदिद्धमेतदनेन संदेहाभावतः शंकाया अविषय इत्यर्थः अत एव इच्छिअमेयंति इष्टं अस्माकमेतत् पडिच्छिअंति प्रतीष्टं युष्मन्मुखान् पतदाशंसनीयं अस्फगतमित्यर्थः इच्छिअपडिच्छिअंति इष्टप्रतीष्टं धर्मद्वययोगादत्यंतादरख्यापनाय चैवं निर्देशः सच्चेणंति प्राणिहितो यमर्थः इति कट्टु त्ति इति भणित्वा भोगार्हा भोगा भोगभोगा

देवाणुप्पिआ तहमेयं देवाणुप्पिआ अवितहमेअं देवाणुप्पिआ असंदिद्धमेअं
देवाणुप्पिआ इच्छिअमेअं देवाणुप्पिआ पडिच्छिअमेअं देवाणुप्पिआ इच्छिअपडिच्छि
अमेअं देवाणुप्पिआ सच्चे णं एसमट्ठे से जहेअं तुब्भे वदह त्तिकट्टु ते सुमिणे सम्मं
पडिच्छइ २ त्ता उसभदत्तेणं माहणेणं सद्धिं उरालाइं माणुस्सगाइं भोगभोगाइं भुंजमाणी वि
हरइ २३ तेणं कालेणं तेणं समएणं सक्के देविंदे देवराया वज्जपाणी पुरंदरे सयक्कउ॥

स्तान् प्राकृतत्वान्नपुंसकत्वं तेणंति शक्रस्य आसनविशेषस्याधिष्ठाता देवानामिंद्रः परमैश्वर्ययुक्तत्वात् देवेषु राजा कांत्यादिगुणैराजमानत्वात् वज्रं पाणौ यस्येति स वज्रपाणिः असुरादि पुराणां दारणात् पुरंदरः शतं क्रतूनां कार्त्तिकश्रेष्ठित्वापेक्षया अभिग्रहविशेषाणां श्रमणोपासकपंचमप्रतिमाणां वा यस्यासौ शतक्रतुः अत्र संप्रदायः पृथिवीभूषणपुरे प्रजापालाभिधो भूमि॥

श्रेष्ठी श्राः कार्त्तिकस्तत्र राजमान्यो महर्द्धिकः १ तेनश्रावकानांश्राद्ध प्रतिमानांशतंकृतं शतक्रतुरितिख्यातिः स
तोलेचेव्सर्वगाः२ मासोपवासस्यगात्रत्र परिव्राजकगैरिकः तदाहारतोजनाःसर्वे प्रसन्नकार्त्तिकंविना श्
श्रावकत्वादैरिकोरुष्टःस्वयंराज्ञःपुरोजगो परिवेषयतिश्रेष्ठी तदैमित्वद्गेहे ४ ततःश्रेष्ठिगृहेराजा ग
त्वाथवाचतंसुज्ञ कवेचांतर्ममावासेगैरिकन्तुपरोलय ५ सोवक्रत्वत्तुरवामिवा कृषिष्येदंत्वदाज्ञया घृष्ट
रसोत्पंगुलिंसंज्ञन् सचालयतितंइति ६ दध्यौचश्राहविष्यप्राग् नास्तविष्यत्तदाह्यदः श्रेष्ठीश्रेष्ठिसहस्रेण
प्राव्राजीत्सुव्रतांतिके ७ पठित्वाद्वादशांगीं स इंद्रो भूद्वादशाब्दकैः गैरिकोवाहनं तस्यैरावणाख्यो
स्वकर्मतः ८ इतिकार्त्तिकश्रेष्ठिकथा सहस्राक्ष ॥ इंद्रस्यकिलपंचमंत्रिशतानि तदीयानांचा१

सहस्सक्ख मघवं पागसासणे दाहि णड्ढलोगाहिवई एरावणवाहणे सुरि
दे बत्तीसविमाणसयसहस्साहिवई अय रंबरवत्थधरे॥

क्षूंषि इंद्रप्रयोजनव्यापृतानि तया इंद्रसंबंधित्वेनवि वक्षणात् सहस्रलोचनत्वं तन्नेत्रयुग्मस्याधिक
दर्शनिहा पडकसुत्रराध्ययनवृत्तौ अहवाउ सहस्सेण अच्छीणं दीसइ तं दोहिं अच्छीहिं अक्खइ अत१
रागंपित्तइत्ति मघामहामेघास्तेविद्यन्ते वशेसंत्यस्य स मघवान् पाकाबलवांस्तांयस्तान पाकोवादा
नवविशेषस्तंशास्ति पाकशासनः मेरुपर्वतापेक्षया दक्षिणार्द्धलोकाधिपतिः मेरोर्दक्षिणतःसर्वस्यलोकाय
त्तत्वात् ऐरावणवाहनः शोभनाराद्धियेषां तेसुराः दीप्तिमंतस्तेषिंद्रः श्रेष्ठाद्वात्रिंशल्लक्षविमानाधिपतिः अरजा
निनिर्मलानियान्यंबराणि वस्त्राणि आकाशकल्पवसनानि धरतीति सतथा॥

आलगितौ यथास्थानंनिवेशितौ मालामुकुटौयेनयस्यवा सतथा नवास्यामिव नूतनास्यामिव हेम्नः सकाशा
चारुस्यो मनोहरास्यो चित्रास्यो आश्चर्यकृत्स्यो चंचलास्यो कुंडलास्यो विलिख्यमानौ गंडौयस्यससमहर्द्धिकः
महाद्युतिकःमहाबलवान् महायशाः महानुभावामहात्म्यंयस्यसः महासौख्यंयस्यसःभासुराबुं१
दिर्दीप्तिर्यस्यसः प्रलंबावनमालाभरणविशेषः पादातलंविलीपुष्पमालायस्यसः सुधर्मनाम्निदेवलोक

आलईअमालमउडे नवहेमचारुचित्तचंचल कुंडलविलिहिज्जमाणगल्ले महड्ढिए मह
ज्जुइए महब्बले महायसे महाणुभावे म हासुक्खे भासुरबुंदी पलंबवणमालधरे
सोहम्मेकप्पे सोहम्मवडिंसए विमा णे सभाए सुहम्माए सक्कंसि सीहासणं
सि सेणंतत्थबत्तीसाए विमाणावाससय साहस्सीणं चउरासीए सामाणिअसा
हस्सीणं तायत्तीसाए तायत्तीसगाणं चउण्हं लोगपालाणं अट्ठण्हं अग्गमहिसीणं॥

सौधर्मावतंसकेविमाने शक्रनाम्निसिंहासने सणंति सइंद्रः णंतिवाक्यालंकारे तत्रदेवलोके विमा
नावासाविमानानिएव सप्तसाहस्रीणांतिलक्षाणां आर्षत्वात्पुंस्त्वं सामानिकाइंद्रसमा आयुष्कादिनावा त्राय
स्त्रिंशामहत्तरकल्पाः पूज्यस्थानीयाः मंत्रिकल्पावा लोकपालाःसोमयमवरुणकुबेराः अग्रमहिष्यःप
द्माः शिवा२ शची३ अंजू४ अमला५ अप्सरा६ नवमिका७ रोहिणी८ ख्याताः॥

तिस्रः परिषदो बाह्यमध्याभ्यंतरा जघन्यमध्यमोत्कृष्टपरिवारस्तताः सप्तानीकानि गंधर्व१नाट्य२हय३गज४र
थ५पदाति६वृषभा७णां७ चतस्रश्चतुरशीतय श्चतुर्दिशं भावात् आत्मरक्षकदेवसहस्राणि षट्त्रिंशत्सहस्रा आ
धिक्यं लक्षत्रयमित्यर्थः आहेवच्चं आधिपत्यं अधिपतिकर्म रक्षेत्यर्थः सा रक्षा सामान्येनारक्षकेणापि क्रि
यते तत्राह पोरेवच्चंति पुरस्य पतिः पुरपतिः तस्य कर्म्म पौरपत्यं पौरोवर्त्यं वा सर्वेषामग्रेसरत्वमिति
भावः तच्चाग्रेसरत्वं नायकत्वमंतरेणापि स्यात् स्वनायकनियुक्ततथाविधगृहचिंतकमान्यपुरुषस्येव तत

सपरिवाराणं तिण्हं परिसाणं सत्तण्हं अणिआ णं सत्तण्हं अणिआहिवईणं चउण्हं चउरा
सीए आयरक्खदेवसाहस्सीणं अन्नेसिं च बहूणं सोहम्मकप्पवासीणं विमाणि
आणं देवाण य देवीण य आहेव च्चं पोरेवच्चं सामित्तं भट्टित्तं महत्तरग
त्तं आणाईसरसेणावच्चं कारेमाणे पालेमाणे महयाहयनट्टगीअ॥

तो नायकत्वप्रतिपत्त्यर्थमाह स्वामित्वं नायकत्वमित्यर्थः एतदपि कदाचित्पोषकत्वमंतरेणापि भवति यथा हरि
णाधिपतेर्हरिणस्य ततआह भट्टित्वं पोषकत्वं अतएव महत्तरकत्वं गुरुतरत्वं तदपि कस्यचिदाज्ञाविकलस्यापि भव
ति यथा कस्यचिद्वणिजः स्वदासदासीवर्गं प्रति ततआह आणेत्यादि आज्ञया ईश्वरः आज्ञेश्वरः सेनायाः पतिः सेनाप
तिः तस्य कर्म आज्ञेश्वरसेनापत्यं स्वसैन्यं प्रति अद्भुतमाज्ञाप्राधान्यमिति भावः अन्यैर्नियुक्तैः कारयन् स्वयमेव पालया १८
न् महयेत्यादि महता रवेणेति योगः आहयत्ति आख्यानकप्रतिबद्धं अहते वा अव्यवच्छिन्नं यन्नाट्यं नाटकं तत्र यद्गी
तं गेयं॥

यानि च वादित्राणि तंत्रीतलतालत्रुटितानि तत्र तंत्री वीणा तल हस्ततालाश्च हस्तास्फोटरवाः तलाः वा हस्ताः ता
लाः कांसिकाः त्रुटितानि शेषतूर्याणि यश्च घनमृदंगो मेघध्वनिर्मर्दलो यच्च पटुपटहवादितमिति कर्मधा
रयगर्भो द्वंद्वः ततस्तेषां यो रवस्तेन भोगान् शब्दादीन् आर्षत्वात् नपुंसकता विहरत्यास्ते केवलः परिपूर्णः स
चासौ कल्पश्च कार्यकरणसमर्थ इति केवलकल्पः केवलएव वा केवलकल्पः समग्रः अथवा परिपूर्णतासाधर्म्या

वाइअतंतीतलतालतुडिअघणमुइंगपडुपडह वाइअरवेणं दिव्वाइं भोगभोगाइं भुंजमाणे
विहरइ १४ इमं च णं केवलकप्पं जंबुद्दीवं दीवं विउलेणं ओहिणा आभोएमाणे२ विहर
इ तत्थ णं समणं भगवं महावीरं जंबुद्दीवे दीवे भारहे वासे दाहिणड्ढभरहे माहणकुंड
ग्गामे नयरे उसभदत्तस्स माहणस्स कोडालसगोत्तस्स भारिआए देवाणंदाए माह
णीए जालंधरसगोत्ताए कुच्छिंसि गब्भत्ताए वक्कंतं पासइ२त्ता हट्ठतुट्ठचित्तमाणंदिए णं
दिए परमाणंदिए पीइमणे परमसोमणस्सिए हरिसवसविसप्पमाणहिअए धाराहयनीवसुरहि
कुसुमचंचुमालइअ ऊससिअरोमकूवे विअसिअवरकमलनयणवयणे॥

केवलकल्पः केवलज्ञानसदृशम् आभोगयन् पश्यन् नंदिएत्ति नंदितः समृद्धतां प्राप्तः परमानंदितो ऽतीव
समृद्धः धाराहतं यन्नीपस्य कदंबस्य सुरभिकुसुमं तद्वत् चंचुमालइअत्ति पुलकितो ऽत एवोच्छ्रितरोमकूपश्च यः स
तथा विकसितमिव भगवत्स्वप्नीतलावतरणदर्शनजनितानंदातिशयात् उत्फुल्ला नि वरकमलवन्नयने वदनं च यस्य स तथा

पाति ×

प्रचलितानि जिनदर्शनजनितसंभ्रमैका कंपितानि वराणि प्रधानानि कटकानि कंकणानि त्रुटिका बाहु-
रक्षिका केयूराणि अंगदानि बाहुमूलविभूषणानि मुकुटं कुंडलयुग्मं सतथा हारविराजद्वक्षाइतिवृ-
त्तं ततः पदद्वयकर्मधारयः पालंबेति पालंबो झुंबनकं सुवर्णमयं प्रलंबमानं लंबमानं घोलंद दोलायमा-
नं भूषणं तद्धारयति यः सतथा संसंभ्रमं सादरं त्वरितं सौत्सुक्यं चपलं वेगवत् क्रियाविशेषणानि स गत्वा

पचलिअवरकडगतुडिअकेऊरमउडकुंड लहारविरायंतवच्छे पालंबपलंबमाणघोल
लंतभूसणधरे ससंभमं तुरिअं चवलं सुरिंदे सीहासणाओ अब्भुट्ठेइ अब्भुट्ठित्ता पायपीढ
ओ पच्चोरुहइ पच्चोरुहित्ता वेरुलिअवरिठ रिठअंजणनिउणोवचिअमिसिमिसिंतम
णिरयणमंडिआओ पाउआओ ओमुअइ ओमुइत्ता एगसाडिअं उत्तरासंगं करेइ करित्ता अं
जलिमउलिअग्गहत्थे तित्थयराभिमुहे स त्तट्ठपयाइं अणुगच्छइ अणुगच्छित्ता वामं जाणुं अंचेइ

क्वापि जिनदर्शनजनितसंभ्रमातिरेकप्रतिपादनपराणि चामूनि पदानि इति भावः पच्चोरुहइत्ति प्रत्यवरोह-
ति अवतरति इत्यर्थः वैडूर्येण मध्यवर्तिना वरिष्ठप्रधानैरिष्ठांजनरत्नविशेषयोर्यो स्तैस्थानि निपुणेन कुश-
लेन शिल्पिना उवचिअत्ति परिकर्मित अतएव मिसिमिसिंतत्ति चिकिचिकायमान मणिभिश्चंद्रकांतादिभिः
रत्नैश्च कर्केतनादिभिः मंडितभूषिते ये ते तथा पादुके अवमुंचति एकशाटकमयं उत्तरासंगं विकक्ष-
कं अंजलित्ति अंजलिना मुकुलीकृतो अग्रहस्तो येन सः अंचेइत्ति आकुंचयति उत्पाटयति॥ १८

साहट्टु संहृत्य निवेश्य त्रिःकृत्वस्त्रीन् वारान् इत्यर्थः ईसिंत्ति मनाक् पच्चुन्नमति अवनतत्वं मुंचतीत्यर्थः कटकेत्या-
दि कंकणबाहुरक्षिका स्तंभितभुजः साहरइत्ति उदंनयति छायादिस्तया रत्नोन्योतरितांगुलिकयोः संपु-
टरूपतया यदवनमीलनं सांजलिस्तं करतलाभ्यां परिगृहीतं निष्पादितः तं आवर्त्तनं आवर्त्तः शिरस्यावर्त्तो
यस्यासौ शिरस्यावर्त्तः कंठेकालवदलुक्समासः ततएवं मस्तके कृत्वा अथवा शिरसा अप्राप्तं असंस्पृष्टं
एवमवादीत् नमोत्थुणमित्यादि नमोत्थुइतिसर्वत्र संबध्यं ताणमितिवाक्यालंकारे सर्वत्र प्राकृते चतुर्थ्यर्थे ष-

वामं जाणुं अंचेत्ता दाहिणं जाणुं धरणितले निसाहट्टु तिक्खुत्तो मुद्धाणं धरणितलंसि नि
निवेसेइ निवेसित्ता ईसिं पच्चुन्नमइ पच्चुन्नमि त्ता कडगतुडिअथंभिआओ भुआओ सा
हरइ साहरित्ता करयलपरिग्गहिअं दसन हं सिरसावत्तं मत्थए अंजलिं कट्टु एवं वयासी

षी ततो देवादिभ्योतिशायइत्यावंदनाद्यर्हत्वादर्हद्भ्यो नमः बहुवचनमद्वैतम १५ नमुत्थुणं अरिहंताणं
